# पञ्चमः पाठः

द्वितीया-विभक्तिः, लृट्लकारः च



**अभिनवः** – मणिके! प्रभात! युवां कुत्र गच्छथः?

**मणिका** – अभिनव! आवां जन्तुशालां गच्छावः।

**अभिनवः** – तत्र युवां किं किं द्रक्ष्यथः?

**प्रभातः** – तत्र आवाम् अनेकान् पशून् द्रक्ष्यावः।

**मणिका** – किं तत्र सिंहाः, भल्लूकाः, हरिणाः सन्ति?

**अभिनवः** – आम्, तत्र वानराः, गजाः, गण्डकाः, मकराः, व्याघ्राः अपि सन्ति। तत्र युवां शशकान्, शल्लकीं, नानाविधान् खगान् अपि द्रक्ष्यथः।

**प्रभातः** – अभिनव! किं जन्तुशालायां सर्पाः अपि भविष्यन्ति?

**अभिनवः** – प्रभात! तत्र नागाः, अजगराः, कृष्णसर्पाः, अन्ये च विविधाः सर्पाः भविष्यन्ति।

**मणिका** – प्रभात! इदानीम् आवां जन्तुशालां गमिष्यावः।

(उभौ जन्तुशालां प्रविशतः, विविधान् जन्तून्, खगान् च पश्यतः।)

**मणिका** – प्रभात! आवाम् इदानीं श्रान्तौ, अधुना विश्रामं करिष्यावः।

**प्रभातः** – मणिके! अत्र अल्पाहारगृहम् अपि भविष्यति। तत्र गच्छावः।
(उभौ अल्पाहारगृहं गच्छतः)

**मणिका** – प्रभात! अत्र मिष्टान्नानि, शीतलपेयानि च सन्ति।



**प्रभातः** – शोभनम्, अधुना आवां मिष्टान्नानि खादिष्यावः, शीतलपेयानि च पास्यावः। ततः गृहं चलिष्यावः।

## शब्दार्थाः



| | | |
|---|---|---|
| **द्रक्ष्यथः** | – | (तुम दोनों) देखोगे/देखोगी |
| **सिंहः** | – | शेर |
| **भल्लूकः** | – | भालू |
| **हरिणः** | – | हिरण |

| | | |
|---|---|---|
| **गजाः** | – | (अनेक) हाथी |
| **गण्डकाः** | – | (अनेक) गेण्डा |
| **मकराः** | – | (अनेक) मगरमच्छ |
| **व्याघ्राः** | – | (अनेक) बाघ |
| **शशकान्** | – | खरगोशों को |
| **शल्लकीम्** | – | साही को |
| **नानाविधान् खगान्** | – | अनेक प्रकार के पक्षियों को |
| **सर्पाः** | – | (अनेक) साँप |
| **नागाः** | – | (अनेक) नाग |
| **अजगराः** | – | (अनेक) अजगर |
| **कृष्णसर्पाः** | – | (अनेक) काले साँप |
| **प्रविशतः** | – | (वे दोनों) प्रवेश करते हैं/करती हैं |
| **श्रान्तौ** | – | (दो) थके हुए |
| **तत्र** (अव्यय) | – | वहाँ |
| **अधुना** | – | अब |
| **मिष्टान्नानि** | – | मिठाइयाँ |
| **शीतलपेयानि** | – | शीतलपेय |
| **ततः** (अव्यय) | – | उसके बाद |

## अभ्यासः



### 1. उच्चारणं कुरुत-

| | | | |
|---|---|---|---|
| (क) | बालकम् | बालकौ | बालकान् |
| | रामम् | रामौ | रामान् |
| | छात्रा | छात्रे | छात्राः |
| | माला | माले | मालाः |
| | पुष्पम् | पुष्पे | पुष्पाणि |
| | व्यजनम् | व्यजने | व्यजनानि |

| | | | |
|---|---|---|---|
| (ख) | खादिष्यति | खादिष्यतः | खादिष्यन्ति |
| | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| | करिष्यामि | करिष्यावः | करिष्यामः |
| | नंस्यति | नंस्यतः | नंस्यन्ति |
| | पास्यसि | पास्यथः | पास्यथ |
| | गमिष्यामि | गमिष्यावः | गमिष्यामः |

2. **कोष्ठकेषु प्रदत्तशब्देषु उपयुक्तविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**

**यथा-** अहं **रोटिकां** खादिष्यामि। (रोटिका)

(क) त्वं ................ पिबसि। (दुग्ध)

(ख) छात्रः ................ द्रक्ष्यति। (दूरदर्शन)

(ग) ताः ................ लेखिष्यन्ति। (कथा)

(घ) वयं ................ गायामः। (कविता)

(ङ) कृषकाः ................ वपन्ति। (बीज)

(च) सा ................ गमिष्यति। (पुस्तकालय)

3. **चित्राणि आधृत्य वाक्यानि पूरयत-**



जनाः ................ नमन्ति।



बालिके ................ धारयतः।



एषा ................ अस्ति।



मृगाः ................ चरन्ति।



बालकाः ................ खादन्ति।

**4. अधोलिखितान् शब्दान् आधृत्य सार्थकानि वाक्यानि रचयत-**

| | | |
|---|---|---|
| अजाः | शिक्षिकां | नंस्यतः |
| वयं | लेखं | रचयामः |
| बालकौ | तृणं | पठिष्यावः |
| आवां | कथां | चरिष्यन्ति |
| त्वं | पुस्तकं | कथयिष्यसि |
| रामः | चित्रं | लेखिष्यति |

| | | | |
|---|---|---|---|
| **यथा–** | अजाः | तृणं | चरिष्यन्ति। |
| (क) | .................... | .................... | .................... |
| (ख) | .................... | .................... | .................... |
| (ग) | .................... | .................... | .................... |
| (घ) | .................... | .................... | .................... |
| (ङ) | .................... | .................... | .................... |

## 5. वचनानुसारं रिक्तस्थानानि पूरयत–

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **यथा–** | कविताम् | कविते | कविताः |
| | ............ | पुस्तके | ............ |
| | ............ | ............ | मयूरान् |
| | कृषकम् | ............ | ............ |
| | ............ | ............ | तृणानि |
| | पदम् | ............ | ............ |

## 6. उदाहरणानुसारं रिक्तस्थानानि पूरयत–

| | **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| **यथा–** | प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| | मध्यमपुरुषः | खादिष्यसि | ................ | ................ |
| | उत्तमपुरुषः | ................ | ................ | खादिष्यामः |

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | ........................ | लेखिष्यतः | ........................ |
| मध्यमपुरुषः | ........................ | ........................ | नंस्यथ |
| उत्तमपुरुषः | गमिष्यामि | ........................ | ........................ |

**7. उदाहरणानुसारं वाक्यानि रचयत–**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **यथा–** | छात्रः कथां पठिष्यति। | छात्रौ कथे पठिष्यतः। | छात्राः कथाः पठिष्यन्ति। |
| (क) | त्वं लेखं लेखिष्यसि। | ..................................। | ..................................। |
| (ख) | ..................................। | बाले वस्त्रे धारयिष्यतः। | ..................................। |
| (ग) | ..................................। | ..................................। | मालाकाराः मालाः रचयिष्यन्ति। |
| (घ) | अहं पुस्तकं पठिष्यामि। | ..................................। | ..................................। |
| (ङ) | ..................................। | ..................................। | बालकाः फलानि खादिष्यन्ति। |

**8. संवादे रिक्तस्थानानि पूरयत–**

**यथा–** **रमा** – लते! किं त्वं विद्यालयं गमिष्यसि?

**लता** – रमे! अहं ........................ न ........................। अहं तु देवालयं ........................।

**रमा** – लते! किं त्वं प्रतिदिनं देवालयं ........................?

**लता** – आम्! अहं ........................ देवालयं ........................। तत्र अहं प्रसादं ........................। त्वं कदा देवालयं ........................?

**रमा** – अहं प्रतिदिनं सायं देवालयं ........................। प्रातः तु विद्यालयं ........................। तत्र पुस्तकानि ........................।